# ५ शासकाः भवनानि च



**चित्रम् – १**

कुत्बमीनारः पञ्चतलात्मकं भवनम् अस्ति । अभिलेखानां पट्टिकाः एतस्य प्रथमस्य तलस्य नीध्रस्य अधः सन्ति । एतस्य भवनस्य प्रथमस्य तलस्य निर्माणं कुत्ब-उद्दीन-ऐबकेन अपि च अवशिष्टानां तलानां निर्माणं १२२९ तमस्य वर्षस्य निकटस्थे काले इल्तुतमिशद्वारा कारितम् अस्ति । बहुभिः वर्षैः एतत् भवनं झञ्झावातेन भूकम्प-कारणेन च क्षतिग्रस्तम् अभवत् । अलाउद्दीन-खलजी, मुहम्मद-तुगलकः, फिरोजशाह-तुगलकः, इब्राहिमलोदी च एतस्य जीर्णोद्धारं कृतवन्तः ।

प्रथमं चित्रं कुत्बमीनारस्य प्रथमं नीध्रं प्रदर्शयति । कुत्बउद्दीन-ऐबकः प्रायः ११९९ तमे वर्षे एतस्य निर्माणं कारितवान् आसीत् । नीध्रस्य अधः लघुतोरणैः तथा च ज्यामितीयाभिः रेखाभिः निर्मितानि प्रारूपाणि पश्यन्तु । किं भवन्तः आलिन्दस्य अधः अभिलेखानां पट्टिकाद्वयं पश्यन्ति ? एते अभिलेखाः अरबीभाषायां सन्ति । अवधीयन्तां यत् मीनार इत्यस्य बाह्यः भागः चक्राकारः कोणीयः च अस्ति । एतादृशे तले अभिलेखं लेखितुम् अत्यधिकायाः परिशुद्धतायाः आवश्यकता भवति स्म । सर्वाधिकाः योग्याः वास्तुकाराः एव एतत् कार्यं सम्पन्नतां प्रति नेतुं शक्नुवन्ति स्म । स्मरन्तु यत् अष्टभ्यः वर्षेभ्यः पूर्वं केवलं कानिचन एव भवनानि पाषाणैः इष्टकाभिः च निर्मितानि भवन्ति स्म । त्रयोदशशताब्द्यां कुत्बमीनारसदृशस्य भवनस्य द्रष्टॄणां च उपरि कीदृशः प्रभावः जातः स्यात् ?

अष्टमशताब्द्याः अष्टादशशताब्द्याः च मध्ये राज्ञां तथा च तेषाम् अधिकारिणः द्विप्रकारस्य भवनानां निर्माणं कृतवन्तः ।



प्रथमप्रकारकेषु भवनेषु सुरक्षितानि संरक्षितानि तथा च इहलोके परलोके च विश्रामस्य भव्यानि स्थानानि दुर्गाः भवनानि समाधिस्थलानि च आसन् । द्वितीयप्रकारकेषु भवनेषु मन्दिराणि, यवनमन्दिराणि, जलाशयाः, कूपाः, यात्रिगृहाणि विपणिसदृशानि जनतायाः उपयोगस्य भवनानि आसन् । राजभ्यः इयम् अपेक्षा भवति स्म यत् ते स्व-प्रजायाः संरक्षणं करिष्यन्ति अपि च प्रजायाः उपयोगाय विश्रामाय च भवनानां निर्माणं कारयित्वा प्रजायाः प्रशंसापात्राणि भविष्यन्ति । एतादृशानि निर्माणकार्याणि वणिग्भिः सहितम् अन्यव्यक्तिभिः अपि क्रियन्ते स्म । ते मन्दिराणां यवनमन्दिराणां कूपानां च निर्माणं कारयन्ति स्म । परन्तु गृहस्थस्थापत्यानां वणिजां च विशालहर्म्याणाम् अवशेषाः अष्टादशशताब्दीतः एव लभ्यन्ते ।

## अभियान्त्रिककौशलं तथा च निर्माणकार्यम्

स्मारकेभ्यः तेषां स्मारकाणां निर्माणे प्रयुक्तशिल्पविज्ञानस्य ज्ञानं भवति । छदेः एव उदाहरणं स्वीकुर्वन्तु । वयं चतसृणां भित्तीनां मध्यभूतान् काष्ठस्य महादण्डान् अथवा कस्यचित् एकस्य पाषाणस्य पट्टिकां स्थापयित्वा छदेः निर्माणं कर्तुं शक्नुमः । परन्तु इदं कार्यं तस्मिन् समये बहुकठिनं भवति स्म यदा वयं कस्यित् विस्तृतस्य अधिरचनायुक्तस्य विशालकक्षस्य निर्माणं कर्तुम् इच्छामः । एतस्य कृते अत्यधिकस्य परिष्कृतस्य कौशलस्य आवश्यकता भवति । सप्तम्याः दशम्याः शताब्द्याः च मध्ये वास्तुकाराः भवनेषु इतोऽपि प्रकोष्ठाणां द्वाराणां वातायनानाम् अधिकं निर्णाणम् आरब्धवन्तः । छदेः द्वाराणां वातायनानां निर्माणं द्वयोः उर्ध्वाधरस्तम्भयोः उपरि भूमेः समानान्तरं किमपि एकं महादण्डं स्थापयित्वा भवति स्म । वास्तुकलायाः इयं शैली "अनुप्रस्थ-टोडा-निर्माणम्" इति उच्यते । अष्टम्याः त्रयोदश्याः शताब्द्याः मध्ये मन्दिराणां यवनमन्दिराणां समाधिस्थलानां सोपानाकारकूपानां वापीनां च निर्माणे अस्याः शैल्याः प्रयोगः अभवत् ।

***चित्रम्** – २ (ख)*



***चित्रम्** – २ (क)*



***चित्रम्** – २ ख* *मेहराबस्य निर्माणे अनुप्रस्थ-टोडा-शैल्याः प्रयोगः*

***चित्रम्** – २ (क)* *देहल्याः कुव्वत-अल-इस्लाम-यवनमन्दिरस्य कश्चन भागः, (द्वादश-शताब्द्याः उत्तरार्धः )*

**आगरादुर्गस्य निर्माणे निहितश्रमः**

अकबरद्वारा निर्मितागरादुर्गस्य निर्माणहेतुः 2,000 तमानां पाषाणकर्तॄणां 2000 तमानाम् अश्मचूर्ण-श्वेताश्मचूर्ण-कर्तॄणां तथा च 8000 कर्मकराणाम् आवश्यकता अभवत् ।

***अधिरचना***

*भूतलतः उपरि कस्यचित् भवनस्य भागः*

**राजस्थानस्य "बूँदी" इत्यत्र स्थिता राज्याः वापी (रानीजी की बावडी) तासु पञ्चाशति वापीषु विशालतमा आसीत् यासां निर्माणं जलस्य आवश्यकतायाः पूर्त्यर्थं कृतम् आसीत् । इयं वापी स्वकीयाय स्थापत्यसौन्दर्याय बहु प्रसिद्धा अस्ति । राज्ञी "नाथावतवर्या" एतस्याः निर्माणम् १६९९ तमे वर्षे अकारयत् । रानी नाथावत "बूँदी" इत्यस्य राज्ञः**




***एकादशशताब्द्याः प्रारम्भे मन्दिरनिर्माणम्***

चित्रम् - ३ क शिवस्य स्तुतौ निर्मितस्य कंदरियामहादेव-मन्दिरस्य निर्माणं चन्देलराजवंशस्य राजा धंगदेवद्वारा ९९९ तमे वर्षे कृतम् आसीत्।

***चित्रम् – ३ ख मन्दिरस्य योजना अस्ति । एकस्मात् अलङ्कृतद्वारात् एतस्य प्रवेशभागः मुख्यसभाभवनं (महामण्डपः) यत्र च नृत्यस्य आयोजनं भवति स्म, यावत् गम्यते स्म । प्रमुखायाः देवतायाः मूर्तिः मुख्यमन्दिरे अर्थात् गर्भगृहे स्थाप्यते स्म । धार्मिकानुष्ठानानि एतस्मिन् स्थाने एव सम्पन्नानि क्रियन्ते स्म तथा च एतस्मिन् केवलं राजानः तेषां निकटतमकुटुम्बजनाः पुरोहिताः च एकत्रिताः भवन्ति स्म । खजुराहो-समूहे राजकीयमन्दिराणि सम्मिलितानि आसन् यत्र सामान्यजनानां कृते गमनस्य अनुमतिः न भवति स्म । एतानि मन्दिराणि सुपरिष्कृताभिः उत्कीर्णमूर्तिभिः अलङ्कृतानि आसन्।***



***चित्रम् - ३ क***

? भवन्तः एतयोः द्वयोः मन्दिरयोः शिखरयोः कानि कानि अन्तराणि पश्यन्ति ? किं भवन्तः एतं ज्ञातुं शक्नुवन्ति यत् राजराजेश्वरमन्दिरस्य शिखरं कंदरियामहादेवस्य मन्दिरस्य शिखरापेक्षया द्विगुणितम् उच्चतरम् अस्ति ?

***चित्रम् – ४***

***तंजावूरस्य राजराजेश्वरमन्दिरस्य शिखरं तस्य कालस्य मन्दिरेषु उच्चतरम् आसीत् । एतस्य निर्माणकार्यं सरलं न आसीत्, यतोहि तेषु दिनेषु किञ्चित् क्रेनयन्त्रं न आसीत् । शिखरस्य शीर्षे ९० टनभारमितस्य पाषाणस्य शिखरं प्रति नयनम् एतावत् भारयुक्तं भवति स्म यत् तं पाषाणं जनाः स्वयम् उत्थाप्य न नेतुं शक्नुवन्ति स्म । अतः एतस्य कार्यस्य कृते वास्तुकाराः मन्दिरस्य शीर्षं यावत् प्राप्तुं उन्नतसोपानाकारमार्गं निर्मापितवन्तः । रोलर इति यन्त्रैः भारयुक्तान् पाषाणान् अनेन मार्गेण उपरि***



*नीतवन्तः । एतस्य कार्यस्य कृते चतुर्किलोपरिमितः लम्बतरः मार्गः सज्जीक्रियते स्म, येन अधिकम् औन्नत्यं न्यूनं भवेत् । मन्दिरस्य निर्माणानन्तरम् एतस्य पतनं कारितम्, परन्तु तस्य क्षेत्रस्य जनाः मन्दिरनिर्माणस्य अनुभवं चिरकालं यावत् स्मृतवन्तः । अद्यत्वे अपि मन्दिरस्य पार्श्वस्थः कश्चन ग्रामः चारू-पल्लमः इति उच्यते, यस्य शाब्दिकः अर्थः उन्नतायुक्तमार्गस्य ग्रामः ।*

द्वादशशताब्द्यां प्रौद्योगिकीद्वयम् अपि च शैलीसम्बद्धानि परिवर्तनानि दृश्यन्ते – द्वारेभ्यः वातायनेभ्यः च उपरितनायाः अधिरचनायाः भारः कदाचित् तोरणेषु निपात्यते स्म । इदं वास्तुकलायाः चापाकारं रूपम् आसीत् ।




चित्रम् - ५ क

तोरणस्य अथवा वृत्तखण्डस्य विशुद्धं रूपं तोरणस्य मध्ये "तोरण" अधिरचनायाः भारं तोरणस्य आधारशिलायां निपातयन्ति ।

द्वितीयस्य चित्रस्य क इति भागस्य अपि च द्वितीयचित्रस्य ख इति भागस्य तुलनां पञ्चमचित्रस्य क इति भागेन अपि च पञ्चमचित्रस्य ख इति भागेन सह कुर्वन्तु ।

(2) निर्माणकार्ये श्वेताश्मचूर्णस्य प्रयोगः वर्धितः । इदम् अत्युत्कृष्टम् अश्मचूर्णं भवति स्म, यस्मिन् पाषाणस्य खण्डानां मेलनेन कंकरीट इत्यस्य निर्माणं भवति स्म । अनेन कारणेन विशालप्रारूपाणां निर्माणं सरलतया तीव्रतया च जायमानम् आसीत् ।



? ज्ञापयन्तु यत् कर्मकराः किं कुर्वन्तः सन्ति, कानि कानि शस्त्राणि दर्शितानि सन्ति तथा च पाषाणानां वहनाय केषां साधनानां प्रयोगः कृतः अस्ति ।

## *मन्दिराणां मसजिदानां जलाशयानां च निर्माणम्*

मन्दिराणां यवनमन्दिराणां च निर्माणम् अतीव विशिष्टपद्धत्या क्रियते स्म यतोहि तानि उपासनायाः स्थलानि आसन् । तानि स्वस्य संरक्षकस्य शक्तेः धन-वैभवस्य भक्तिभावस्य च अपि प्रदर्शनं कुर्वन्ति स्म । उदाहरणार्थं राजराजेश्वरमन्दिरं स्वीकर्तुं शक्यते । एकस्मात्



चित्रम् – ५ ख

तोरणस्य विशुद्धरूपम् अलाई-द्वारस्य तोरणम् (प्रारम्भिक-चतुर्दशशताब्दी), कुव्वत-अल-इस्लाम-यवनमन्दिरम् देहली ।

चित्रम् – ६

आगरादुर्गे जल-द्वारनिर्माणस्य कलां दर्शयत् किमपि चित्रम् । इदं अकबरनामातः सङ्कलिताम् अस्ति ।

अभिलेखात् एतस्य विषयस्य सङ्केतः उपलभ्यते यत् एतस्य मन्दिरस्य निर्माणं राजाराजदेवः स्वस्य इष्टदेवस्य राजराजेश्वरस्य उपासनाहेतोः कृतवान् आसीत् । अवधानं यच्छन्तु यत् राज्ञः तस्य इष्टदेवस्य च नामनी प्रायः समाने एव स्तः भजतः । राजा एतादृशं नामकरणम् एतदर्थं कृतवान् यतोऽहि एतत् नाम मङ्गलकारि आसीत् तथा च राजा आत्मानं ईश्वररूपेण दर्शयितुम् इच्छति स्म । धार्मिकस्य अनुष्ठानस्य माध्यमेन मन्दिरे एका देवता (राजाराजदेवः) अपरायाः देवतायाः(राजराजेश्वरः) सम्माननं करोति स्म । सर्वेषां विशालतमानां मन्दिराणां निर्माणं राजानः कारयन्ति स्म । मन्दिरस्य अन्यलघुदेवाः शासकस्य सहयोगिनां तथा च अधीनस्थानां देवीदेवाः आसन् । एतत् मन्दिरं शासकस्य तस्य च सहयोगिभिः शासितविश्वस्य किमपि लघुरूपम् एव आसीत् । यथा ते राजकीयमन्दिरेषु एकत्रीभूय स्वदेवानाम् उपासनां कुर्वन्ति स्म तेन इत्थं प्रतीयते स्म यत् ते देवानां न्यायप्रियं शासनम् एव लोके अनुसरन्तः स्युः ।

**कश्चन राजकीयः वास्तुशिल्पी**

शाहजहाँ इति मुगल-शाकस्य इतिहासकारः शासकम् “साम्राज्यस्य धर्मस्य च कार्यशालायाः वास्तुशिल्पी” इति उद्घोषितवान् ।

मुस्लिमशासकाः अथवा सम्राजः “वयम् आत्मानं भगवतः अवतारभूताः स्मः” इति घोषणां न कुर्वन्ति स्म परन्तु फारसीराजसभायाः इतिहासेषु “अल्लाह इत्यस्य छाया” इति रूपेण शासकस्य वर्णनम् अस्ति । देहल्याः कस्यचित् एकस्य यवनमन्दिरस्य अभिलेखतः ज्ञायते यत् अल्लाहः अलाउद्दीनं शासकरूपेण एतदर्थं चितवान्, यतोहि तस्मिन् अतीतकालस्य महतां विधिकर्तॄणां मूसायाः सलेमानस्य च विशिष्टताः विद्यमानाः आसन् । सर्वेषु श्रेष्ठयोः विधिकर्त्रोः वास्तुकारः च अल्लाहः स्वयम् आसीत् । सः अव्यवस्थां दूरीकृत्य विश्वस्य सृजनं कृतवान् तथा च काञ्चित् व्यवस्थां समरूपता सन्तुलनं च स्थापितवान् ।

प्रत्येकं राजवंशस्य सत्तारूढे सति राजा शासकभावस्य स्वनैतिकेषु अधिकारेषु बलाघातं कृतवान् । उपासना-स्थानानां निर्माणं शासकेभ्यः ईश्वरेण सह स्वघनिष्ठसम्बन्धानाम्

चित्रम् – ७ स्वकीयां नूतनराजधान्यां शाहजहांनाबादे (१६५०-५६) शाहजहांद्वारा निर्मितस्य जामीयवनमन्दिरस्य योजना ।



उद्घोषणायाः अवसरं ददाति स्म । एतादृश्यः उद्घोषणाः तीव्रतया परिवर्तमान-राजनीतेः सन्दर्भे महत्त्वपूर्णाः आसन् । शासकाः विदुषेभ्यः धर्मनिष्ठजनेभ्यः आश्रयं दत्तवन्तः अपि च स्वस्य राजधानीः नगराणि च महत्त्वपूर्णसांस्कृतिककेन्द्रेषु परिवर्तयितुं प्रयासं कृतवन्तः । एतेन सर्वेण तेषां शासनं राज्यं च ख्यातं जातम् ।

एतत् व्यापकचिन्तनम् आसीत् यत् न्यायप्रियस्य राज्ञः राज्यम् एतादृशं भविष्यति, यत्र समृद्धिः भविष्यति यत्र च पर्याप्तरूपेण वृष्टिः भविष्यति । अनेन एव प्रकारेण कूपानां जलाशयानां च निर्माणेन बहुमूल्यस्य जलस्य उपलब्धताकार्यस्य बहु प्रशंसा क्रियते स्म । शासकः इल्तुतमिशः देहली-ए-कुहना इत्यस्य पार्श्वे एव विशाल-जलाशयस्य निर्माणं कृत्वा व्यापकं सम्मानं प्राप्तवान् । अयं विशालजलाशयः “हौज-ए-सुलतानी” इति अथवा “राज्ञः तडागः” इति उच्यते स्म । शासकाः प्रायः समान्यजनानां कृते बृहताम् एवञ्च लघूनां जलाशयानां तडागानां च निर्माणं कारयन्ति स्म । किं भवन्तः एतं तृतीय अध्यायस्य प्रथमे मानचित्रे अन्वेष्टुं शक्नुवन्ति ? शासकाः प्रायः समान्यजनानां कृते बृहतां लघूनां च जलाशयानां तडागानां च निर्माणं कारयन्ति स्म । कदाचित् कदाचित् ते कस्यचित् मन्दिरस्य यवनमन्दिरस्य (सप्तमे चित्रे जामीमसजिद इत्यस्य लघुजलाशये ध्यानं यच्छन्तु) अथवा गुरुद्वारस्य च भागभूताः इति भवन्ति स्म । गुरुद्वारा सिक्खानां एकत्रितभवनस्य उपासनायाः च स्थानं भवति, अष्टमे चित्रे द्रष्टुं शक्नुवन्ति ।

**जलस्य महत्त्वम्**

आबाद” तथा च “आबादी” इति फारसीशब्दौ “आब” इत्यतः व्युत्पन्नौ स्तः ययोः अर्थः “जलम्” अस्ति । आबाद-शब्दः तस्य स्थानस्य कृते प्रयुज्यते यत्र वस्तिः स्यात् । एतस्य कश्चन अन्यः अर्थः समृद्धिः इत्यपि अपि अस्ति । “आबादी” इत्यस्य जनसङ्ख्या समृद्धिः च इति द्वौ अर्थौ अपि भवतः ।

### *मन्दिराणि किमर्थं नष्टीकृतानि ?*

राजानः मन्दिराणां निर्माणं स्वस्य शक्तेः धनसम्पदः ईश्वरं प्रति निष्ठायाः च प्रदर्शनार्थं कुर्वन्ति स्म । एतादृश्याम् अवस्थायाम् अयं विषयः आश्चर्यजनकः न प्रतिभाति यत् यदा ते अन्येषां राज्येषु आक्रमणं कृतवन्तः, तदा प्रायः एतादृशानि भवनानि तेषां आक्रमणानां केन्द्राणि आसन् ।



**चित्रम् -८**
हरमंदरसाहब इति (स्वर्णमन्दिरम्) अपि च तस्य पवित्रसरोवरः, अमृतसरः

चित्रम् – मुगल-चारबाग इति



(क)हुमायूँ इत्यस्य स्मारकस्य चारबाग इति देहली, 1562-71



(ख)काश्मीरे शालीमारबागस्य सोपानाकारः चारबाग इति, 1620 अपि च 1634



(ग) लालमहलवातायने चारबाग इत्येतं तटीयोद्यानस्य रूपे स्वकृतम्, 1637

नवम्याः शताब्द्याः आरम्भे यदा पांड्यनराजा श्रीमरश्रीबल्लभः श्रीलङ्कायाः उपरि आक्रमणं कृत्वा राजासेनप्रथमं (८३१-८५१)पराजितवान् आसीत्, तस्य विषये बौद्धभिक्षुः अपि च इतिहासकारः धम्मकित्तिः लिखितवान् यत्, "सर्वाणि बहुमूल्यानि वस्तूनि अनयत् --- रत्नमहले स्थापितस्वर्णनिर्मितबुद्धस्य मूर्तिं --- अपि च विभिन्नमठेषु स्थापितसुवर्णस्य प्रतिमाः – सः एतानि सर्वाणि स्वायत्तीकृतवान् ।" एतस्मात् सिंहलीशासकस्य आत्माभिमानः आहतः अभवत् येन तस्य कृते अस्य प्रतिकारः स्वाभाविकः आसीत् । सेनद्वितीयः स्वकीयं सेनापतिं पाण्ड्यानां राजधान्याः "मदुरयी" इत्यस्याः उपरि आक्रमणं कर्तुम् आदिष्टवान् । अस्मिन् अभियाने बुद्धस्य स्वर्णमूर्तेः अन्वेषणस्य प्रत्यानयनस्य च महत्त्वपूर्णाः प्रयासाः सम्लितिताः आसान् ।

अनेन एव प्रकारेण एकादशशताब्द्याः प्रारम्भे यदा चोलराजा राजेन्द्रप्रथमः स्वस्य राजधान्यां शिवमन्दिरस्य निर्माणं कारितवान् आसीत् तदा सः पराजितशासकैः परिहृताभिः उत्कृष्टप्रतिमाभिः एतत् पूर्णं कृतवान् । कस्याञ्चित् अपूर्णायां सूच्यां चालुक्येभ्यः प्राप्ता काचित् सूर्यपीठिका, गणेशमूर्तिः अपि च दुर्गायाः अनेकाः मूर्तयः, पूर्वीचालुक्येभ्यः प्राप्ता काचित् नंदीमूर्तिः, उडीसायाः कलिङ्गतः प्राप्ता भैरवस्य भैरव्याः च एका प्रतिमा तथा च बङ्गस्य पालेभ्यः प्राप्ता कालीदेव्याः प्रतिमा इति सर्वं सम्मिलितम् आसीत् ।

सः गजनीदेशस्य शासकः महमूदः राजेन्द्रप्रथमस्य समकालिकः आसीत् । भारते स्वकीयानाम् अभियानानां काले पराजितानां राज्ञां मन्दिराणि अपवित्राणि कृतानि । अपि च तेषां धनानि मूर्तीः अपहृतवान् । तस्मिन् काले शासकः महमूदः महत्वपूर्णः शासकः न आसीत्, परन्तु मन्दिराणि नष्टीकृत्य विशेषतया सोमनाथमन्दिरं सः कश्चन महान् यवनयोद्धा अस्ति इति श्रेयसः प्राप्तेः प्रयासं कृतवान् । मध्यमकालस्य राजनीतिक-संस्कृतौ अधिकतराः शासकाः स्वस्य राजनीतिकबलस्य सैनिकसफलतायाः च प्रदर्शनं पराजितशासकानाम् उपासनास्थलेषु आक्रमणं कृत्वा तानि उपासनास्थलानि विलुण्ठ्य कुर्वन्ति स्म ।

? राजेन्द्रप्रथमस्य महमुदगजनवी च इत्यनयोः नीतयः केषु रूपेषु समकालिनस्य समस्य दानम् आसीत् अपि च केषु रूपेषु एते परस्परं भिन्नाः आसन् ?

### उद्यानानि, समाधिस्थलानि दुर्गाणि च

मुगलानाम् अधीनस्थाः वास्तुकलाः इतोऽपि जटिलतराः अभवन् । बाबरः, हूमायूँ, अकबरः. जहांगीरः विशेषत्वेन शाहजहां इति मुगलशासकाः साहित्ये कलायां वास्तुकलायां च व्यक्तिगतरूपेण रुचिं वहन्ति स्म । बाबरः आत्मकथायाम् औपचारिकोद्यानानां निर्माणे विषये तेषां च क्रियान्वयने स्वकीयायाः रुच्याः च वर्णनं

कृतवान् अस्ति । प्रायः एतानि उद्यानानि भित्त्या आवृत्तानि भवन्ति स्म अपि च कृत्रिमकूल्याभिः आयताकारेषु चतुर्षु प्राकारेषु विभक्तानि आसन् । बाबरः औपचारिकाणाम् उद्यानानां योजनासु तासां क्रियान्वयने प्रारूपस्य सज्जीकरणे स्वरुच्याः वर्णनं कृतवान् ।



जहांगीरः शाहजहां च चतुर्षु विभागेषु विभाजन-कारणतः एतानि "चारबाग" अर्थात् चत्वारि उद्यानानि इति उच्यन्ते स्म । चतुर्णाम् उद्यानानां निर्माणस्य परम्परा अकबरस्य कालतः आरब्धा । केषाञ्चित् सुन्दराणाम् चतुर्णाम् उद्यानानां निर्माणं काश्मीरेषु आगरायां देहल्यां च कारितवन्तौ ।

अकबरस्य शासनकाले बहुप्रकारकाः महत्त्वपूर्णाः वास्तुकलात्मकाः नवाचाराः अभवन् । अकबरस्य वास्तुशिल्पकाराः एतेषां नवाचाराणां प्रेरणां तस्य मध्यैशियापूर्वजस्य तैमूरस्य समाधिस्थलात् स्वीकृतवन्तः । हूमायूँ इत्यस्य समाधिस्थले सर्वादौ प्रयुक्तं दर्शनीयं केन्द्रीयं शिखरम् (यत् उच्चतरम् आसीत्) अपि च उच्चतरं तोरणयुक्तं प्रवेशद्वारं (पिश्तक) मुगलवास्तुकलायाः महत्त्वपूर्णानि अङ्गानि जातानि । इदं समाधिस्थलं कस्यचित् विशालस्य औपचारिकस्य “चारबाग” इत्यस्य मध्ये स्थितम् आसीत् । एतस्य निर्माणम् अष्टौ स्वर्गाः अथवा हश्त-विहिश्त इति कस्याञ्चित् परम्परायां जातं आसीत् यस्यां एकः केन्द्रीयकक्षः अष्टभिः प्रकोष्ठैः आवृत्तः भवति स्म । एतस्य भवनस्य निर्माणं रक्त-सिकता-पाषाणैः जातः आसीत् एतस्य तटप्रान्ताः श्वेतपाषाणैः (सितराजाश्मैः) निर्मिताः आसन् ।



चित्रम् - १० काबुले चारबाग इत्यस्य रचनां कुर्वतः बाबरस्य १५९० तमवर्षस्य काचित् चित्रकला । ध्यायन्तां कीदृशे मार्गे परस्परं कर्तयन्ती कूल्याः चारबाग इत्यस्य योजनां विशिष्टं करोति ।

***चित्रम् – ११***

१५६२ अपि च १५७१ इति वर्षाभ्यन्तरे मध्ये निर्मिते हमायूँ इत्यस्य स्मारकम् । किं भवन्तः कुल्याः द्रष्टुं शक्नुवन्ति ?

चित्रम् – १२

देहल्यां दीवान –ए-आम इत्यस्मिन् सिंहासनस्य प्रान्तभागः। एतस्य निर्माणं १६४८ तमे वर्षे पूर्णं जातम्।



***पितरा-दूरा***

*उत्कीर्ण-श्वेतशैलानाम् अथवा सिकता-पाषाणानाम् उपरि नानावर्णयुक्तान् दृढपाषाणान् योजयित्वा निर्मितानि सुन्दराणि अलङ्कृतानि च प्रारूपाणि।*

शाहजहांवर्यस्य शासनकालस्य अवधौ मुगलवास्तुकलायाः विभिन्नानि तत्त्वानि एकस्मिन् विशाले सद्भावपूर्णे संश्लेषणे मेलिताः । शाहजहां इत्यस्य शासनकाले निर्माणकार्याणि विशेषरूपेण आगरायां देहल्यां च अनवरतम् अचलन्। सार्वजनिकायाः व्यक्तिगतायाः च सभायाः हेतोः समारोहकक्षाणां (दीवान –ए – खास अपि च दीवान – ए – आम) योजना अतीव सावधानीपूर्वकं निर्मीयते स्म। कस्मिञ्चित् विशाले प्राङ्गणे स्थिताः एताः राज्यसभाः चिहिल-सुतुन इति अथवा चत्वारिंशत् स्तम्भानां सभाभवनानि इति अपि उच्यन्ते स्म।

शाहजहां इत्यस्य सभा-भवनानि विशेषरूपेण यवनमन्दिरसदृशानि निर्मितानि आसन्। तस्य सिंहासनं यस्मिन् मञ्चे स्थापितम् आसीत् सः किबला (नमाज इति काले मुस्लिमजनानां पुरस्था दिशा) इति उच्यते स्म यतोहि यस्मिन् समये राजसभा चलति स्म तस्मिन् समये प्रत्येकं जनः ताम् अभिमुखीभूय एव उपविशति स्म । एतेषां वास्तुकलात्मकानाम् अभिलक्षणानाम् एतं प्रति सङ्केतः भवति स्म यत् राजा पृथिव्याम् ईश्वरस्य प्रतिनिधिः आसीत्।

शाहजहांवर्यः देहल्याः रक्तदुर्गस्य स्वस्य नवनिर्मितराजसभायां राजकीयस्य न्यायस्य विशिष्टराजसभायाः च अन्तःसम्बन्धे बहुबलं दत्तवान् । सम्राजः सिंहासनस्य पृष्ठतः पितरा-दूरा इत्यस्य जटितकार्यस्य काञ्चित् शृङ्खलां निर्मिता आसीत् यस्याम् “आर्फियस” इति पौराणिकः यूनानिदेवः वीणां वादयन् चित्रितः आसीत्।

इत्थं मन्यते स्म यत् "आर्फियस" इत्यस्य सङ्गीतम् आक्रामकान् पशून् अपि शान्तान् कर्तुं शक्नोति अपि च ते शान्तिपूर्वकं परस्परं वसन्ति । शाहजहांवर्यस्य सार्वजनिकसभाभवनस्य निर्माणम् एतत् सूचयति स्म यत् न्यायकाले राजा उच्चवर्गैः निम्नवर्गैः च सह समानव्यवहारं करिष्यति तथा च सर्वे जनाः परस्परं सद्भावेन सह स्थास्यन्ति।

शाहजहां इत्यस्य शासनस्य आरम्भिकवर्षेषु राजधानी आगरा आसीत्। अस्मिन् नगरे विशिष्टवर्गाः स्वस्य गृहाणां निर्माणं यमुनायाः तीरेषु कारितवन्तः आसन् । एतेषां निर्माणम् "चारबाग" इत्यस्य रचनायाः समम् एव औपचारिकोद्यानानां मध्ये कृतम् आसीत् ।"चारबाग" इत्यस्य योजनायाः अन्तर्गतम् एव भिन्नप्रकारस्य उद्यानानि अपि आसन् यानि इतिहासकाराः "नदी-तट-उद्यानानि" इति कथयन्ति । एवंविधे उद्याने निवासस्थानम् "चारबाग" इत्यस्य मध्ये न आसन् अपितु नदीतटानां नातिदूरे उद्यानस्य सर्वथा तटे एव भवति स्म।

शाहजहां स्वशासनस्य भव्यतमा वास्तुकलात्मकोपलब्धिः ताजमहल इत्यस्य मानचित्रे नदी-तटोद्यानस्य योजनाम् (मापरूपम्) अनुसृतवान् । अत्र श्वेतमणिशिलायाः यवनमृत्युस्मारकः नदीतटस्य एकस्मिन् प्रान्तदेशे तथा च उद्यानम् एतस्य दक्षिणे निर्मितम् आसीत्। शाहजहां नदीतटे सर्वेषाम् अभिजातानां प्राप्तिं नियन्त्रयितुम् एतत् वास्तुकलात्मकरूपेण विकसितवान् । सः देहल्यां शाहजहांनाबादे यत् नूतनं नगरं निर्मापितवान् तस्मिन् राजभवनं नदीतटे स्थितम् आसीत् । केवलं विशिष्टकृपाप्राप्ताभिजातानां कृते यथा तस्य ज्येष्ठपुत्रस्य दाराशिकोहस्य कृते एव नदीं यावत् गन्तुम् आज्ञा आसीत्। अन्यैः सर्वैः स्वस्य गृहस्य निर्माणं यमुनानदीतः दूरे नगरे करणीयं भवति स्म।



**चित्रम् – १३**

आगरास्थं ताजमहल इति यवनसमाधिस्थलम्, यस्य निर्माणम् १६४३ तमे वर्षे पूर्णम् अभवत्।



चित्रम् – १४

एकस्मात् मानचित्रात् आगरायाः नदीतट-उद्यान-नगरस्य पुनर्कल्पितं दृश्यम् । अवधानं यच्छन्तु यत् कथं यमुनायाः द्वयोः तटयोः अभिजातानाम् उद्यान-प्रसादाः स्थिताः सन्ति । ताजमहल इति वामपक्षे अस्ति । १५ चित्रे प्रदत्तदेहल्याः शाहजहांनाबादस्य मापरूपस्य तुलनाम् आगरायाः मापरूपेण सह कुर्वन्तु ।



यमुना-नदी

चित्रम् – १५

१८५० तमस्य वर्षस्य शाहजहांनाबास्य किमपि मानचित्रम् । राज्ञः निवासः कुत्र अस्ति ? नगरं बहुसघनम् इति प्रतीयते परन्तु किं भवन्तः अत्र महान्ति उद्यानानि अपि द्रष्टुं तथा च मुख्यमार्गं जामीयवनमन्दिरं च अन्वेष्टुं शक्नुवन्ति ।

## क्षेत्राणि साम्राज्यानि च

अष्टम्याः अष्टादश्याः च शताब्द्याः मध्ये यदा निर्माणसम्बद्धासु गतिविधिषु वृद्धिः जाता, तदा विभिन्नक्षेत्राणां मध्ये विचाराणाम् अपि पर्याप्तमात्रया आदानं प्रदानं च अभवत्। एकस्य क्षेत्रस्य परम्पराः अपरेण क्षेत्रेण अङ्गीकृता । उदाहरणार्थं विजयनगरे राज्ञां गजशालासु बीजापुरस्य गोलकुंडासदृशानां पार्श्वस्थानां साम्राज्यानां वास्तुकलात्मकशैल्याः अतीव प्रभावः अभवत्। षष्ठाध्याये पश्यन्तु। मथुरायाः समीपे स्थिते वृन्दावने निर्मितमन्दिराणां वास्तुकलात्मकशैली फतेहपुरसीकरी इत्यस्य मुगलभवनैः सह बहुसाम्यतां भजन्ते स्म।

विशालसाम्राज्यानां निर्माणेन विभिन्नक्षेत्राणि तेषां शासनस्य अधीनानि जातानि। एतेन कलात्मकरूपाणां वास्तुकलात्मकशैलीनां च परस्परसंवर्धने साहाय्यं लब्धम्।



**१६ चित्रम्**

वृन्दावने गोविंददेवस्य मन्दिरस्य अन्तर्भागः १५९०, एतस्य मन्दिरस्य निर्माणं रक्तसिकता-पाषाणानि अभवत्। द्वयोः प्रतिच्छेदितोरणयोः अवधानेन पष्यन्तु, याभ्याम् एतस्य उच्चान्तच्छद्याः निर्माणं कृतम् आसीत्। वास्तुकलायाः इयं शैली उत्तर-पूर्वी-ईरातः आगता अपि च फतेहपुरसीक री इत्यत्र एतस्य प्रयोगः कृतः आसीत्।

मुगलशासकाः स्वस्य भवनानां निर्माणे क्षेत्रीयवास्तुकलात्मकशैल्याः स्वीकरणे विशेषतया दक्षाः आसन्। उदाहरणार्थं बङ्गे स्थानीयैः शासकैः तृणकुटीरस्य समान-दर्शनीयायाः छदेः निर्माणं कारितम् । मुगलशासकेभ्यः एतत् "बाङ्गला-गोलाकारशिखरम् एतावत् अरोचत् यत् ते स्वस्यां वास्तुकलायाम् एतस्य प्रयोगं कृतवन्तः। अकबरस्य राजधानी फतेहपुरसीकर्याः बहुषु भवनेषु गुर्जरस्य मालवायाः च वास्तुकलात्मकशैलीनां प्रभावः दृश्यते।



अष्टादशशताब्द्याः आरभ्य मुगलशासकानां सत्तायाः चाक्चक्यविरहितायाः अनन्तरम् अपि तेषाम् आश्रये विकसितायाः वास्तुकलात्मकशैल्याः निरन्तरप्रयोगे अतिष्ठत् अपि च अन्यशासकाः यदा आत्मनः राज्यस्थापनस्य प्रयासं कृतवन्तः तदा ते एतां शैलीम् एव अङ्गीकृतवन्तः ।

*17- चित्रम् फतेहपुरसीकर्याः जोधाबायीमहालये छदेः विस्तारं वहन्तः अलङ्कृतस्तम्भाः उपस्तम्भाः च । एते गुर्जरक्षेत्रस्य वास्तुकलात्मकपरम्पराभ्यः प्रभाविताः सन्ति ।*

**आकाशं स्पृशन्ति क्राईस्टमन्दिराणि**



द्वादशताब्दीतः फ्रांसदेशे आरम्भिकभवनानाम् अपेक्षया उच्चतराणाम् अल्पभारयुक्तानां च क्राईस्टमन्दिराणां निर्माणस्य प्रयासाः प्रारब्धाः । वास्तुकलायाः इयं शैली "गोथिक" नाम्ना ज्ञायते । अस्याः शैल्याः वैशिष्ट्यानि सन्ति कण्टकिला-तोरणानि, वर्णयुक्तस्य काचस्य प्रयोगः, यस्मिन् प्रायः बायीबिलतः गृहीतदृश्यानां चित्रणम् अस्ति तथा च उड्यमानाः पुश्ते इति । दूरतः एव दृश्यमानाः उच्च-शङ्क्वग्र-स्तम्भाः अपि च घण्टायुक्ताः स्तम्भाः पश्चात् योजिताः सन्ति । अस्याः वास्तुकलात्मकशैल्याः सर्वोत्कृष्टज्ञातेषु उदाहरणेषु पेरिसदेशस्य एकं नात्रेडमक्राईस्टमन्दिरम् अस्ति ।

? प्रथमे चित्रे एकं दृष्टिपातं कुर्वन्तु अपि च घण्टायुक्तानां बुर्ज इत्येतेषाम् अन्वेषणस्य प्रयासं कुर्वन्तु ।

## कल्पनां कुर्वन्तु



भवान् शिल्पकारः अस्ति अपि च भूमितः पञ्चाशत्मीपरिमितो स्थाने वेणुदण्डस्य रज्जोः च सहायतया निर्मितस्य काष्ठस्य एकस्मिन् लघुतरे मञ्चे स्थितः अस्ति। भवता कुत्बमीनार इत्यस्य प्रथमस्य प्रान्तभागस्य अधः एकः अभिलेखः योजनीयः अस्ति। भवान् एतत् कार्यं कथं करिष्यति ?

## पुनः स्मरन्तु

१ वास्तुकलायाः "अनुप्रस्थटोडानिर्माण-सिद्धान्तः "चापाकार-सिद्धान्ततः केन प्रकारेण भिन्नः अस्ति।

२ "शिखरः" इत्यस्मात् भवतां कः अभिप्रायः अस्ति ?

३ "पितरा-दूरा" इति किम् अस्ति ?

४ कस्यचित् मुगलचारबाग इत्यस्य काः मुख्याः विशेषताः सन्ति ?

## आगच्छन्तु जानीमः

५ कस्माच्चित् मन्दिरात् एकस्य राज्ञः महत्तायाः सूचना कथं लभ्यते ?

६ देहल्यां शाहजहः दीवान –ए – खास इत्यस्मिन् अभिलेखे उक्तम् अस्ति –"यदि पृथिव्यां कुत्रचित् स्वर्गः अस्ति तर्हिः सः अत्र एव अस्ति, अत्र एव अस्ति, अत्रैव अस्ति ? इयं धारणा कथम् अभवत् ?

७ मुगलराजसभातः एतस्य विषयस्य सङ्केतः कथं लभ्यते यत् सम्राजः धनिभ्यः निर्धनेभ्यः शक्तिशालिभ्यः कृषकजनेभ्यः च समानन्यायस्य प्राप्तिः भविष्यति ?

८ शाहजहांनाबादे नूतनस्य मुगलनगरस्य योजनायां यमुनानद्याः का भूमिका आसीत् ?

### बीज-शब्दः

सम्पूर्णं पाठं पठित्वा षण्णां शब्दानाम् एकां सूचीं निर्मान्तु। एतस्यां प्रत्येकं कृते एतस्य तर्कस्य पुरस्सरं ज्ञापनीयं यत् भवन्तः तस्य शब्दस्य चयनं किमर्थं कृतवन्तः, एकेन वाक्येन लिखन्तु।

## आगच्छन्तु विचारयामः

९ अद्यत्वे धनिनः शक्तिशालिनः च जनाः विशालगृहाणां निर्माणं कारयन्ति। अतीतकाले राज्ञां तेषां राजपुरुषाणां च निर्माणानि केषु अर्थेषु एतेभ्यः भिन्नानि आसन् ?

१० चतुर्थे चित्रे दृष्टिपातं कुर्वन्तु । इदं भवनं कथम् अद्य तीव्रगत्या निर्मापयितुं शक्यते ?

## आगच्छन्तु कृत्वा पश्यामः

११ जानन्तु यत् किं भवतां ग्रामे अथवा नगरे कस्यचित् महापुरुषस्य काचित् प्रतिमा किमपि स्मारकं च अस्ति ? एतत् तत्र किमर्थं स्थापितम् अस्ति ? एतस्य प्रयोजनं किम् अस्ति ?

१२ स्वस्य परिवेशे विद्यमानस्य कस्यचित् उद्यानस्य पर्यटनस्थानस्य च यात्रां कृत्वा तस्य वर्णनं कुर्वन्तु । केषु अर्थेषु एतानि मुगलोद्यानानां समानानि भिन्नानि च सन्ति?